वा पुनस्तत्रैव स्थापयेत। ततः शान्त्यै अघोरेण तिलैः सहस्रं हुत्वा प्रार्थयेत। "भगवान् भूतभव्येश! लोकनाथ! जगत्पते!। जीर्णलिङ्गसमुद्धारः कृतस्तवाज्ञया मया। अग्निना दारुजं दग्धं चिप्तं शैलादिकं जले। प्रायश्चित्ताय देवेश! अघोरास्त्रेण तर्पितम्। ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि। तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वरेति"। ततो यजमानः प्रार्थयेत। "गोविप्रशिल्पिभूतानामाचार्य्यस्य च यज्वनः। शान्तिर्भवतु देवेश! अच्छिद्रं जायतामिदम्"। मूर्त्तौ तु विशेषः। "त्वत्प्रसादेन निर्विघ्नं देहं निर्मापयत्यसौ। वासं कुरु सुरश्रेष्ठ! तावत्त्वं चात्मके गृहे। वसन् क्षेमं सहित्वेह मूर्त्तिं वै तव पूर्ववत्। यावत् कारयेत् भक्तः कुरु तस्य च वाञ्छितमिति"। ततो नवां मूर्त्तिं लिङ्गं वा कृत्वोक्तविधिना स्थापयेत्।

भग्नमन्दिरादेः २संस्कारे च स च विष्णुधर्मोत्तरे तृतीयकाण्डे उक्तो यथा "यस्य राज्ञस्तु विषये देववेश्म विशीर्य्यते। तस्य सीदति तद्राज्यं देववेश्म यथा तथा। कृत्वा जीर्णस्य संस्कारं तथा देवेशवेश्मनि। द्विगुणं फलमाप्नोति नात्र कार्य्या विचारणा"। विष्णुरहस्ये "पतितस्य च यः कर्त्ता पतमानस्य रक्षिता। विष्णोरायतनस्येह स नरो विष्णुलोकभाक्" अग्निपुराणे "पतितं पतमानन्तु तदार्द्धस्फुटितं नरः। समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात्" देवीपुराणे "मूलाच्छतगुणं पुण्यं प्राप्नुयाज्जीर्णकारकः। तस्मात् सर्वप्रयत्नेन जीर्णस्योद्धारमाचरेत्"। हयशीर्षपञ्चरात्रे "वापीकूपतड़ागानां सुरधाम्नां तथानघ!। प्रतिमानां समानाञ्च संस्कर्त्ता यो नरो भुवि। पुण्यं शतगुणं तस्य भवेन्मूलान्न संशयः। प्रतिष्ठाया विधिः कार्य्यस्तथा मन्दिरनिर्म्मिते। प्रायः श्रीहयशीर्षोक्तेरनुसारेण वैष्णवैः। देवालयप्रतिष्ठा च ख्याता तल्लिखनेन किम्। श्रीमूर्त्तिस्थापनेनैव संपूर्णा सा विशेषतः। देवगृहं देवतायाः प्रतिष्ठाविधिना सदा। संस्कार्य्यं मनुजानान्तु समुदायोऽस्य कर्म्मणा" हरिभक्ति०२० विलासः।

**जीवि** पु० जृ—क्विन्। कुठारे उज्ज्वलदत्तः।

**जीव** प्राणने असुधारणे भ्वा०अक०प०सेट्। जीवति अजीवीत् जिजीव। ऋदित् अजिजीवत् त जीवितं जीवनम् जीवः जीविका। "संशयं पुनरारुह्य यदि जीवति पश्यति" हितो० "यातः परमपि जीवेज्जीवितनाथो भवेत्तस्याः" सा०द० "ज्योग् जीवति" छा उ०। "शतं जीवन्तु शरदः" ऋ०१०।१८।१। प्राणधारणञ्च प्राणधारणोयोगोपहृत्ति धारणमपि "नक्षत्रैर्यस्य जीवति" मनुः। करणे सक०। "जीवेद्वैश्यस्य जीविकाम्" मनुः। जीवेत् कुर्य्यात् [रघुः।

अति+अतिक्रम्य जीवने सक०। "अत्यजीवदमरालकेश्वरौ"

अनु+पश्चाज्जीवने अनुरूपजीवने च सक०। "जीवन्तं त्वानुजीवन्तु प्रजाः सर्वा युधिष्ठिर!" भा० उ० ४५।३५ श्लो० "यां तां श्रियमसूयामः पुरा दृष्ट्वा युधिष्ठिरे। अद्य तामनुजीवामः" भा० द्रो० ४११ श्लो०।

आ+वृत्तिकरणे उपभोगे च सक०। "आजीवन् स्वेच्छया दण्ड्यो दाप्यस्तञ्चापि सोदयम्" याज्ञ०। "आजीवनुपभुञ्जानः" मिता०। "ययाजीवन्ति पुरुषं सर्वभूतानि सञ्जय!" भा०उ०१३२अ०।

उद्+उच्छ्वासने अक०। "उदजीवत् सुमित्राभूर्भ्रातोऽस्निग्धत्तमायतम्" भट्टिः।

प्रति+उद्+प्रतिरूपोज्जीवने।

उप+आश्रित्य वर्त्तने सक०। "पूर्ववयसे पुत्राः पितरमुपजीवन्ति उत्तरवयसे पुत्रान् पिता" शत० ब्रा० १२।२।३।१। "शेषास्तमुपजीवेयुर्यथैव पितरं तथा" मनुः। उपजीवी उपजीव्यः।

**जीव** पु० जीव—कर्त्तरि क। १प्राणिनि २जीवन्तीवृक्षे ३वृहस्पतौ च मेदि०। ४कर्णे ५चेतन्ये त्रिका०। भावे घञ्। ६असुधारणे अमरः करणे घञ्। ७वृत्तौ आजीविकायां मेदि०। मनुष्यादिकीटपर्यन्ते ८प्राणिमात्रे ९कार्य्यकारणसङ्घाते। अनेकान्तवादिनां जीवास्तिकायसंज्ञया परिभाषिते १०पदार्थभेदे। त्रिविधश्चासौ अनादिसिद्धमुक्तबद्धभेदात्। अत्रानादिसिद्धोऽर्हन् जीवास्तिकायाख्यः। व्यपेतमोहादिबन्धो मुक्तः। मोहाद्यावृतस्तु बद्ध इति। ११उपाधिप्रविष्टे वाङ्मनःप्राणकरणग्रामानुप्रविष्टे ब्रह्मणि। घटावच्छिन्नाकाशवत् शरीरत्रितयावच्छिन्ने १२चैतन्ये। दर्पणस्थमुखप्रतिबिम्बवद् बुद्धिस्थे १३चैतन्यप्रतिबिम्बे।१४साभासाहङ्कारे चित्प्रतिबिम्बे। प्राणादिकलापस्य १५धारयितरि "प्राणान् चेतनरूपेण धारयन् जीव उच्यते" इत्यभियुक्तोक्तेः १६लिङ्गदेहे। "एवं पञ्चविधं लिङ्गं त्रिवृत् षोड़श विस्तृतम्। एष चेतनया युक्तो जीव इत्यभिधीयते" इति श्रीभागवतम्। पञ्चविधं पञ्चतन्मात्रात्मकम्। त्रिवृत् त्रिगुणम्। षोड़श विकारात्मना विस्तृतमित्यनाद्यभिमानित्वेन इहलोक